AS-7575 Seat No. ________

# M. A. (Part - II) Examination

## March / April - 2016

## Sanskrit : Paper - IX

*(Prose, Champu & Historical Poems)*

**(ગદ્ય, ચમ્પૂ અને ઐતિહાસિક કાવ્ય)**

Time : 3 Hours] [Total Marks : **100**

૧ (અ) નીચેનામાંથી કોઈ પણ બે પરિચ્છેદોનો અનુવાદ કરો : ૧૨

**1** (a) Translate any two of the following Passages : **12**

(१) पुरा किल भगवान्स्वलोकमधितिष्ठन्परमेष्ठी विकासिनि पद्मविष्टरे समुपाविष्टः सुनासीरप्रमुखैर्गीर्वाणैः परिवृतो ब्रह्मोद्याः कथाः कुर्वन्नन्याश्च निरवद्या विद्यागोष्ठीर्भावयन् कदाचिदासाञ्चक्रे । तथासीनं च तं त्रिभुवनप्रतीक्ष्यं मनुदक्षचाक्षुषप्रभृतयः प्रजापतयः सर्वे च सप्तर्षिपुरः सरा महर्षयः सिषेविरे । केचिदृचः स्तुतिचतुराः समुदचारयन् । केचिदपचितिभाञ्जि यजूंष्यपठन् । केचित्प्रशंसासामानि सामानि जगुः ।

(२) ततो 'मर्षय भगवन् अभूमिरेषा शापस्य' इत्यनुनाथ्यमानोऽपि विबुधैः, 'उपाध्याय स्खलितमेकं क्षमस्व' इति बद्धाञ्जलिपुटैः प्रसाद्यमानोऽपि स्वशिष्यैः, 'पुत्र मा कृथास्तपसः प्रत्यूहम्' इति निवार्यमाणोऽप्यत्रिणा, रोषावेशविवशो दुर्वासा 'दुर्विनीते ! व्यपनयामि ते विद्याजनितामुन्नतिमिमामधस्ताद्गच्छ मर्त्यलोकम्' इत्युक्त्वा तच्छापोदकं विससर्ज । प्रतिशापोद्यतां सावित्रीम् 'सखि संहर रोषमसंस्कृतमतयोऽपि जात्यैव द्विजन्मानो माननीयाः' इत्यभिदधाना सरस्वत्येव न्यवारयत् ।

(३) दधीचस्तु........ उवाच – 'आर्य, करिष्यति प्रसादमार्याराध्यमाना । पश्यामस्तावत्तातम् । उत्तिष्ठ । ब्रजामः' इति । तथेति च तेनाभ्यनुज्ञातः शनकैरुत्थाय कृतनमस्कृतिरुच्चचाल । तुरगारूढं च तं प्रयान्तं सरस्वती सुचिरमुत्तम्भिपक्ष्मणा निश्चलतारकेण लिखितेनेव चक्षुषा व्यलोकयत् । उत्तीर्य च शोणमचिरेणैव कालेन दधीचः पितुराश्रमपदं जगाम । गते च तस्मिन् सा तामेव दिशमालोकयन्ती सुचिरमतिष्ठत् । कृच्छ्रादिव च संजहार दृशम् ।

(४) अथ सारस्वतो मातुर्महिम्ना यौवनारम्भ एवाविर्भूता–शेषविद्यासम्भारस्तस्मिन्सवयसि भ्रातरि प्रेयसि प्राणसमे सुहृदि वत्से वाङ्मयं समस्तमेव अञ्चारयामास । चकार च कृतदारपरिग्रहस्यास्य तस्मिन्नेव प्रदेशे प्रीत्या प्रीतिकूटनामानं निवासम् । आत्मनाष्यषाढी कृष्णाजिनी, अक्षवलयी, वल्कली, मेखली, जटी च भूत्वा तपस्यतो जनयितुरेव जगामन्तिकम् ।

(બ) નીચેનામાંથી કોઈ પણ બે સંદર્ભ સાથે સમજાવો : ૮

(b) Explain with reference to the context any two of the following : 8

(१) क्षमा हि मूलं सर्वतपसाम् ।

(२) नेयमाकृतिर्दिव्यतां व्यभिचरति ।

(३) सतां हि प्रियंवदता कुलविधा ।

(४) प्रख्यातैव मन्मथस्य दुर्निवारता ।

२ 'बाणोच्छिष्टं जगत्सर्वम्' – આ વિધાનની ચર્ચા કરો. २०

2 'बाणोच्छिष्टं जगत्सर्वम्' – Discuss this Statement. 20

**અથવા / OR**

२ નીચેનામાંથી કોઈ પણ બે વિષે વિવેચનાત્મક નોંધ લખો : २०

2 Write critical notes on any two of the following : 20

(१) બાણનું મિત્રમંડળ

(1) The friend circle of Bana.

(२) बाणभट्टकृता पूर्वसूरिवन्दना ।

(३) सरस्वती वर्णनम् ।

(४) दधीचः ।

૩ (અ) નીચેનામાંથી કોઈ પણ એક પરિચ્છેદનો અનુવાદ કરો : ૧૦

**3** (a) Translate any one of the following Passages : **10**

(१) यस्यां च दिव्यदेवकुलालंकृताः स्वर्गा इव मार्गाः, सततमपांसुवसनाः सागरा इव नागराः, समत्तवारणानि वनानीय भवनानि, सुरसेनान्विताः स्वर्गभूपा इव कूपाः, अधिगंधरोदेशमुद्भासयन्तो हारा इव विहाराः। यस्यां च बहुलक्षणाः सुधावन्तो दृश्यन्तेऽन्तः प्रचुराः प्रासादा बहिश्च वारणेन्द्राः । सुशोभिरङ्गाः समालोक्यन्तेऽन्तः संगीतशाला बहिश्च क्रीडाकमलदीर्घिकाः । बहुधान्यनिरुद्धाः कथमप्यभिगम्यन्तेऽन्तः पण्यस्त्रियो बहिश्च क्षेत्रभूमयः । नानाशुकविभूषणाः शोभन्तेऽन्तः सभा बहिश्च सहकारवन–राजयः । ससौगन्धिकप्रसारा विराजन्तेऽन्तर्विपणयो बहिश्चसलिलाशयाः ।

(२) तदेवंविधाः खलु महनीया महानुभावा भवन्ति इत्येवमवधार्य समुपसृत्य 'स्वकान्तिनिर्जितमकरध्वजाय तुभ्यम्' इत्यवादीत् । राजापि सविस्मयमना मनागुन्नमितमस्तकः स्वागतप्रश्नेनाभिनन्द्य 'तीर्थयात्रिक, कुतः प्रष्टव्योऽसि । क्व च कियच्चाद्यापि गन्तव्यम् । उपविश । विश्रम्य कथय काञ्चिदपूर्वां किंवदन्तीम् । अनेकदेशदृश्वानः किलाश्चर्यदर्शिनो भवन्तीति। न चाकस्मिकं दर्शनमपूर्वः परिचयः स्वल्पा प्रीतिरित्येकमप्याशङ्कनीयम्। अपूर्वदर्शनेऽपि न जात्या मणयः स्वच्छतामप ह्नुवते । मुहूर्तमेकत्र गोष्ठीसुखमनुभववा' इत्येनमवादीत् । असावपि 'अपूर्वकौतुक–कथाकर्णनरसिक, श्रूयतां यद्येवम्' इत्यभिधाय सुखोपविष्टस्यास्य समीपे स्वयमुपविश्य कथयितुमारभत ।

(બ) કોઈ પણ એક પર નોંધ લખો : ૧૦

(b) Write a note on any two of the following : **10**

(१) नलपथिकप्रसङ्गः ।

(२) त्रिविक्रमस्य ग्रन्थाः ।

૪ ઐતિહાસિક કાવ્યોની પરંપરામાં કલ્હણનું પ્રદાન મૂલવો. ૨૦

4 Evaluate Kalhana's contribution to the tradition of Historical Poems. 20

અથવા / OR

૪ નીચેનામાંથી કોઈ પણ બે પર વિસ્તૃત નોંધ લખો : ૨૦

4 Write note in detail any two of the following : 20

(१) कल्हणस्य काश्मीरप्रेमः ।

(२) कल्हणकृता कविप्रशस्तिः ।

(३) कल्हणस्य काव्यशैली ।

(४) राजतरङ्गिणी शीर्षकम् ।

૫ કોઈ પણ બે પર વિસ્તારથી નોંધ લખો : ૨૦

5 Write a note in detail on any two of the following : 20

(१) रामायणस्य ऐतिहासिकता ।

(२) महाभारतस्य ऐतिहासिकता ।

(३) हम्मीर महाकाव्यम् ।

(४) मुद्राराक्षसम् ।